# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१४)

## १९.०२.२०१३

# पुनरावर्तनम्

- वर्णादनुदात्तात्तोपधात्तो नः ।
  - वर्णवाची
  - अनुदात्तान्तः
  - तोपधः
- ङीप्, तकारस्य नकारादेशश्च ।
- एनी/एता, रोहिणी/रोहिता ।

# ४९७. अन्यतो ङीष् (४.१.४०)

- पदद्वयम् । अन्यतः, ङीष् ।
- 'वर्णादनुदात्तात्तोपधात्तो नः' (४.१.३९) इत्यतः 'वर्णात्, अनुदात्तात्, तोपधात्' इति अनुवर्तते ।
- तोपधभिन्नाद् वर्णवाचिनः अनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीष् स्यात् ।
- कल्माषी ।
- कल्माषीति ।
- सारङ्गी ।
- सारङ्गीति ।
- 'लघावन्ते द्वयोश्च बह्वचो गुरुः' (फि ४२) इति मध्योदात्तावेतौ ।

- अनुदात्तान्तात् किम्?
- कृष्णा, कपिला ।
- फिट्-स्वरेण अन्तोदात्ताविमौ ।

# ४९८. षिद्गौरादिभ्यश्च (४.१.४१)

- पदद्वयम् । षित्-गौरादिभ्यः,च ।
- 'अन्यतो ङीष्' (४.१.४०) इत्यतः 'ङीष्' इति अनुवर्तते ।
- षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात् ।
- नर्तकी ।
- नर्तकीति ।
- गौरी ।
- गौरीति ।

# अनडुहः स्त्रियाम् आम् वा (वा)

- अनड्वाही, अनडुही ।
- अनड्वाही, अनडुहीति ।

- पिप्पल्यादयश्च (ग ४७)
- पिप्पल्यादयश्चेति ।

- आकृतिगणोऽयम् ।
- आकृतिगणोऽयमिति ।

# ४९९. सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः (६.४.१४९)

- पदत्रयम् । सूर्य-तिष्य-अगस्त्य-मत्स्यानां, यः, उपधायाः ।
- 'अङ्गस्य' (६.४.१) इति अधिक्रियते । 'ढे लोपोऽकद्र्वाः' (६.४.१४७) इत्यतः 'लोपः' इति अधिक्रियते ।
- अङ्गस्य उपधायाः यस्य लोपः स्यात् स चेद्यः सूर्याद्यवयवः ।

# मत्स्यस्य ङ्याम् (वा)

- तेनेह न - मत्स्यस्येदं मात्स्यम् ।
- मत्सी ।
- मत्सीति ।

# सूर्यागस्त्ययोश्छे च ङ्यां च (वा)

- सूर्यागस्त्ययोश्छे च ङ्यां चेति ।
- सूरी ।
- अगस्ती ।

# तिष्यपुष्ययोः नक्षत्राणि यलोप इति वाच्यम् (वा)

- तिष्येति ।
- ‘मातरि षिच्च’ (वा) इति षित्त्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितो ङीष् ।
- मातरीति ।
- दंष्ट्रा ।
- दंष्ट्रेति ।